# સુંદરકાંડ

રામાય શાશ્વતસુવિસ્તૃતષડ્ગુણાય
સર્વેશ્વરાય બલવીર્યમહાર્ણવાય |
નત્વા લિલઙ્ઘયિષુરર્ણવમુત્પપાત
નિષ્પીડ્ય તં ગિરિવરં પવનસ્ય સૂનુઃ || ૧||

ચુક્ષોભ વારિધિરનુપ્રયયૌ ચ શીઘ્રં
યાદોગણૈઃ સહ તદીયબલાભિકૃષ્ટઃ |
વૃક્ષાશ્ચ પર્વતગતાઃ પવનેન પૂર્વં
ક્ષિપ્તોઽર્ણવે ગિરિરુદાગમદસ્ય હેતોઃ || ૨||

શૈલો હરસ્ય ગિરિપક્ષવિનાશકાલે
ક્ષિપ્તોઽર્ણવે સ મરુતોર્વરિતાત્મપક્ષઃ |
હૈમો ગિરિઃ પવનજસ્ય તુ વિક્રમાર્થ-
મુદ્ભિદ્ય વારિધિમવર્ધદનેકસાનુઃ || ૩||

નૈવાત્ર વિક્રમણમૈચ્છદવિશ્રમોઽસૌ
નિઃસીમપૌરુષબલસ્ય કુતઃ શ્રમોઽસ્ય |
આશ્લિષ્ય પર્વતવરં સ દદર્શ ગચ્છન્
દેવૈસ્તુ નાગજનનીં પ્રહિતાં વરેણ || ૪||

જિજ્ઞાસુભિર્નિજબલં તવ ભક્ષમેતુ
યદ્યત્ત્વમિચ્છસિ તદિત્યમરોદિતાયાઃ |
આસ્યં પ્રવિશ્ય સપદિ પ્રવિનિઃસૃતોઽસ્માત્
દેવાનનન્દયદુત સ્વકમેષુ રક્ષન્ || ૫||

દૃષ્ટ્વા સુરપ્રણયિતાં બલમસ્ય ચોગ્રં
દેવાઃ પ્રતુષ્ટુવુરમું સુમનોઽભિવૃષ્ટ્યા |
તૈરાદૃતઃ પુનરસૌ વિયતૈવ ગચ્છન્
છાયાગ્રહં પ્રતિદદર્શ ચ સિંહિકાખ્યમ્ || ૬||

લઙ્કાવનાય સકલસ્ય ચ નિગ્રહેઽસ્યાઃ
સામર્થ્યમપ્રતિહતં પ્રદદૌ વિધાતા |
છાયામવાક્ષિપદસૌ પવનાત્મજસ્ય
સોઽસ્યાઃ શરીરમનુવિશ્ય બિભેદ ચાશુ || ૭||

નિઃસીમમાત્મબલમિત્યસુદર્શયાનો
હત્વૈવ તામપિ વિધાતૃવરાભિગુપ્તામ્ |
લમ્બે સ લમ્બશિખરે નિપપાત લઙ્કા-
પ્રાકારરૂપકગિરાથ ચ સઞ્ચુકોચે || ૮||

ભૂત્વા બિડાલસમિતો નિશિ તાં પુરીં ચ
પ્રાપ્સ્યન્ દદર્શ નિજરૂપવતીં સ લઙ્કામ્ |
રુદ્ધોઽનયાઽઽશ્વથ વિજિત્ય ચ તાં સ્વમુષ્ટિ-
પિષ્ટાં તયાનુમત એવ વિવેશ લઙ્કામ્ || ૯||

માર્ગમાણો બહિશ્ચાન્તઃ સોઽશોકવનિકાતલે |
દદર્શ શિંશપાવૃક્ષમૂલસ્થિતરમાકૃતિમ્ || ૧૦||

નરલોકવિડમ્બસ્ય જાનન્ રામસ્ય હૃદ્ગતમ્ |
તસ્ય ચેષ્ટાનુસારેણ કૃત્વા ચેષ્ટાશ્ચ સંવિદમ્ || ૧૧||

તાદૃક્ચેષ્ટાસમેતાયા અઙ્ગુલીયમદાત્તતઃ |
સીતાયા યાનિ ચૈવાસન્નાકૃતેસ્તાનિ સર્વશઃ || ૧૨||

ભૂષણાનિ દ્વિધા ભૂત્વા તાન્યેવાસન્ તથૈવ ચ |
અથ ચૂડામણિં દિવ્યં દાતું રામાય સા દદૌ || ૧૩||

યદ્યપ્યેતન્ન પશ્યન્તિ નિશાચરગણાસ્તુ તે |
દ્યુલોકચારિણઃ સર્વે પશ્યન્ત્યૃષય એવ ચ || ૧૪||

તેષાં વિડમ્બનાયૈવ દૈત્યાનાં વઞ્ચનાય ચ |
પશ્યતાં કલિમુખ્યાનાં વિડમ્બોઽયં કૃતો ભવેત્ || ૧૫||

કૃત્વા કાર્યમિદં સર્વં વિશઙ્કઃ પવનાત્મજઃ |
આત્માવિષ્કરણે ચિત્તં ચક્રે મતિમતાં વરઃ || ૧૬||

અથ વનમખિલં તદ્રાવણસ્યાવલમ્બ્ય
ક્ષિતિરુહમિમમેકં વર્જયિત્વાઽઽશુ વીરઃ |

રજનિચરવિનાશં કાંક્ષમાણોઽતિવેલં
મુહુરતિરવનાદી તોરણં ચારુરોહ || ૧૭||

અથાશૃણોદ્દશાનનઃ કપીન્દ્રચેષ્ટિતં પરમ્ |
દિદેશ કિઙ્કરાન્ બહૂન્ કપિર્નિગૃહ્યતામિતિ || ૧૮||

સમસ્તશો વિમૃત્યવો વરાદ્ધરસ્ય કિઙ્કરાઃ |
સમાસદન્મહાબલં સુરાન્તરાત્મનોઽઙ્ગજમ્ || ૧૯||

અશીતિકોટિયૂથપં પુરઃસરાષ્ટકાયુતમ્ |
અનેકહેતિસઙ્કુલં કપીન્દ્રમાવૃણોદ્બલમ્ || ૨૦||

સમાવૃતસ્તથાઽઽયુધૈઃ સ તાડિતશ્ચ તૈર્ભૃશમ્ |
ચકાર તાન્ સમસ્તશસ્તલપ્રહારચૂર્ણિતાન્ || ૨૧||

પુનશ્ચ મન્ત્રિપુત્રકાન્ સ રાવણપ્રચોદિતાન્ |
મમર્દ સપ્તપર્વતપ્રભાન્ વરાભિરક્ષિતાન્ || ૨૨||

બલાગ્રગામિનસ્તથા સ શર્વવાક્સુગર્વિતાન્ |
નિહત્ય સર્વરક્ષસાં તૃતીયભાગમક્ષિણોત્ || ૨૩||

અનૌપમં હરેર્બલં નિશમ્ય રાક્ષસાધિપઃ |
કુમારમક્ષમાત્મનઃ સમં સુતં ન્યયોજયત્ || ૨૪||

સ સર્વલોકસાક્ષિણઃ સુતં શરૈર્વવર્ષ હ |
શિતૈર્વરાસ્ત્રમન્ત્રિતૈર્ન ચૈનમભ્યચાલયત્ || ૨૫||

સ મણ્ડમધ્યગાસુતં સમીક્ષ્ય રાવણોપમમ્ |
તૃતીય એષ ભાંશકો બલસ્ય હીત્યચિન્તયત્ || ૨૬||

નિધાર્ય એવ રાવણો રાઘવસ્ય નાન્યથા |
યુધીન્દ્રજિન્મયા હતો ન ચાસ્ય શક્તિરીક્ષ્યતે || ૨૭||

અતસ્તયોઃ સમો મયા તૃતીય એષ હન્યતે |

વિચાર્ય ચૈવમાશુ તં પદોઃ પ્રગૃહ્ય પુપ્લુવે || ૨૮||

સ ચક્રવદ્ભ્રમાતુરં વિધાય રાવણાત્મજમ્ |
અપોથયદ્ધરાતલે ક્ષણેન મારુતીતનુઃ || ૨૯||

વિચૂર્ણિતે ધરાતલે નિજે સુતે સ રાવણઃ |
નિશમ્ય શોકતાપિતસ્તદગ્રજં સમાદિશત્ || ૩૦||

અથેન્દ્રજિન્મહાશરૈર્વરાસ્ત્રસમ્પ્રયોજિતૈઃ |
તતશ્ચ વાનરોત્તમં ન ચાશકદ્વિચાલને || ૩૧||

અથાસ્ત્રમુત્તમં વિધેર્મુમોચ સર્વદુઃસહમ્ |
સ તેન તાડિતો હરિર્વ્યચિન્તયન્નિરાકુલઃ || ૩૨||

મયા વરા વિલઙ્ઘિતા હ્યનેકશઃ સ્વયમ્ભુવઃ |
સ માનનીય એવ મે તતોઽત્ર માનયામ્યહમ્ || ૩૩||

ઇમે ચ કુર્યુરત્ર કિં પ્રહૃષ્ટરક્ષસાં ગણાઃ |
ઇતીહ લક્ષ્યમેવ મે સ રાવણશ્ચ દૃશ્યતે || ૩૪||

ઇદં સમીક્ષ્ય બદ્ધવત્ સ્થિતં કપીન્દ્રમાશુ તે |
બબન્ધુરન્યપાશકૈર્જગામ ચાસ્ત્રમસ્ય તત્ || ૩૫||

અથ પ્રગૃહ્ય તં કપિં સમીપમાનયંશ્ચ તે |
નિશાચરેશ્વરસ્ય તં સ પૃષ્ટવાંશ્ચ રાવણઃ || ૩૬||

કપે કુતોઽસિ કસ્ય વા કિમર્થમીદૃશં કૃતમ્ |
ઇતીરિતઃ સ ચાવદત્ પ્રણમ્ય રામમીશ્વરમ્ || ૩૭||

અવેહિ દૂતમાગતં દુરન્તવિક્રમસ્ય મામ્ |
રઘૂત્તમસ્ય મારુતિં કુલક્ષયે તવેશ્વરમ્ || ૩૮||

ન ચેત્ પ્રદાસ્યસિ ત્વરન્ રઘૂત્તમપ્રિયાં તદા |
સપુત્રમિત્રબાન્ધવો વિનાશમાશુ યાસ્યસિ || ૩૯||

ન રામબાણધારણે ક્ષમાઃ સુરેશ્વરા અપિ |
વિરિઞ્ચશર્વપૂર્વકાઃ કિમુ ત્વમલ્પસારકઃ || ૪૦||

પ્રકોપિતસ્ય તસ્ય કઃ પુરઃ સ્થિતૌ ક્ષમો ભવેત્ |
સુરાસુરોરગાદિકે જગત્યચિન્ત્યકર્મણઃ || ૪૧||

ઇતીરિતે વધોદ્યતં ન્યવારયદ્વિભીષણઃ |
સ પુચ્છદાહકર્મણે ન્યયોજયન્નિશાચરાન્ || ૪૨||

અથાસ્ય વસ્ત્રસઞ્ચયૈઃ પિધાય પુચ્છમગ્નયે |
દદુર્દદાહ નાસ્ય તન્મરુત્સખો હુતાશનઃ || ૪૩||

મમર્ષ સર્વચેષ્ટિતં સ રક્ષસાં નિરામયઃ |
બલોદ્ધતશ્ચ કૌતુકાત્ પ્રદગ્ધુમેવ તાં પુરીમ્ || ૪૪||

દદાહ ચાખિલાં પુરીં સ્વપુચ્છગેન વહ્નિના |
કૃતિસ્તુ વિશ્વકર્મણોઽપ્યદહ્યતાસ્ય તેજસા || ૪૫||

સુવર્ણરત્નકારિતાં સ રાક્ષસોત્તમૈઃ સહ |
પ્રદહ્ય સર્વશઃ પુરીં મુદાન્વિતો જગર્જ વૈ || ૪૬||

સ રાવણં સપુત્રકં તૃણોપમં વિધાય વૈ |
તયોઃ પ્રપશ્યતોઃ પુરીં વિધાય ભસ્મસાદ્યયૌ || ૪૭||

વિલઙ્ઘ્ય ચાર્ણવં પુનઃ સ્વજાતિભિઃ પ્રપૂજિતઃ |
પ્રભક્ષ્ય વાનરેશિતુર્મધુ પ્રભું સમેયિવાન્ || ૪૮||

રામં સુરેશ્વરમગણ્યગુણાભિરામં
સમ્પ્રાપ્ય સર્વકપિવીરવરૈઃ સમેતઃ |
ચૂડામણિં પવનજઃ પદયોર્નિધાય
સર્વાઙ્ગકૈઃ પ્રણતિમસ્ય ચકાર ભક્ત્યા || ૪૯||

રામોઽપિ નાન્યદનુદાતુમમુષ્ય યોગ્યમ્-

અત્યન્તભક્તિભરિતસ્ય વિલક્ષ્ય કિઞ્ચિત્ |
સ્વાત્મપ્રદાનમધિકં પવનાત્મજસ્ય
કુર્વન્ સમાશ્લિષદમું પરમાભિતુષ્ટઃ || ૫૦||

ઇતિ શ્રીમદાનન્દતીર્થીયમહાભારતતાત્પર્યનિર્ણયે રામચરિતે
હનુમત્પ્રતિયાનં સુન્દરકાણ્ડકથાનિર્ણયઃ ||